Gurvaṣṭakam

This chant, composed by the great preceptor *Ādi-śaṅkara*, extols the importance of reverence to one's teacher. All wealth, wisdom, effort and success come to naught if one fails to honor the teacher, whereas absolute devotion protects the student from harm, even by divine forces.

Ce chant, composé par le grand précepteur *Ādi-śaṅkara*, exalte l'importance de la révérence à son professeur. Toutes les richesses, la sagesse, l'effort et le succès sont réduits à néant si l'on n'honore pas son professeur, tandis que la dévotion absolue protège l'élève du mal, même causé par des forces divines.

Dieser Chant, wurde von dem großen Lehrer *Ādi-śaṅkara,* komponiert und preist die Bedeutung der Achtung seinem Lehrer gegenüber. Aller Reichtum, alle Weisheit, Kraft und Erfolg wird zunichte gemacht, wenn jemand seinem Lehrer nicht die notwendige Achtung entgegenbringt. Wogegen Respekt und Achtung gegenüber dem Lehrer, den Schüler vor Schaden, auch durch höhere Gewalt, beschützen.

॥ गुर्वष्टकम् ॥

शरीरं सुरूपं तथा वा कळत्रं
यशश्चारु चित्रं धनं मेरुतुल्यम् ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ १ ॥

कळत्रं धनं पुत्रपौत्रादि सर्वं
गृहं बान्धवाः सर्वमेतद्धि जातम् ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ २ ॥

षडङ्गादिवेदो मुखे शास्त्रविद्या
कवित्वादि गद्यं सुपद्यं करोति ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ३ ॥

विदेशेषु मान्यः स्वदेशेषु धन्यः
सदाचारवृत्तेषु मत्तो न चान्यः ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ४ ॥

|| Gurvaṣṭakam ||

śarīraṁ surūpaṁ tathā vā kaḷatraṁ

yaśaścāru citraṁ dhanaṁ merutulyam |

manaścenna lagnaṁ guroraṁghripadme

tataḥ kiṁ tataḥ kiṁ tataḥ kiṁ tataḥ kim || 1 ||

kaḷatraṁ dhanaṁ putrapautrādi sarvaṁ

gṛhaṁ bāndhavāḥ sarvametaddhi jātam |

manaścenna lagnaṁ guroraṁghripadme

tataḥ kiṁ tataḥ kiṁ tataḥ kiṁ tataḥ kim || 2 ||

ṣaḍaṅgādivedo mukhe śāstravidyā

kavitvādi gadyaṁ supadyaṁ karoti |

manaścenna lagnaṁ guroraṁghripadme

tataḥ kiṁ tataḥ kiṁ tataḥ kiṁ tataḥ kim || 3 ||

videśeṣu mānyaḥ svadeśeṣu dhanyaḥ

sadācāravṛtteṣu matto na cānyaḥ |

manaścenna lagnaṁ guroraṁghripadme

tataḥ kiṁ tataḥ kiṁ tataḥ kiṁ tataḥ kim || 4 ||

क्षमामण्डले भूपभूपाळवृन्दैः
सदा सेवितं यस्य पादारविन्दम् ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ५ ॥

यशो मे गतं दिक्षु दानप्रतापात्
जगद्वस्तु सर्वं करे यत्प्रसादात् ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ६ ॥

न भोगे न योगे न वा वाजिराजौ
न कान्तामुखे नैव वित्तेषु चित्तम् ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ७ ॥

अरण्ये न वा स्वस्य गेहे न कार्ये
न देहे मनो वर्तते मे त्वनर्घ्ये ।
मनश्चेन्न लग्नं गुरोरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥ ८ ॥

गुरोरष्टकं यः पठेत्पुण्यदेही
यतिर्भूपतिर्ब्रह्मचारी च गेही ।
लभेद्वाञ्छितार्थं पदं ब्रह्मसंज्ञम्
गुरोरुक्तवाक्ये मनो यस्य लग्नम् ॥ ९ ॥

kṣamāmaṇḍale bhūpabhūpāḷavṛndaiḥ
sadā sevitaṁ yasya pādāravindam |
manaścenna lagnaṁ guroraṁghripadme
tataḥ kiṁ tataḥ kiṁ tataḥ kiṁ tataḥ kim || 5 ||

yaśo me gataṁ dikṣu dānapratāpāt
jjagadvastu sarvaṁ kare yatprasādāt |
manaścenna lagnaṁ guroraṁghripadme
tataḥ kiṁ tataḥ kiṁ tataḥ kiṁ tataḥ kim || 6 ||

na bhoge na yoge na vā vājirājau
na kāntāmukhe naiva vitteṣu cittam |
manaścenna lagnaṁ guroraṁghripadme
tataḥ kiṁ tataḥ kiṁ tataḥ kiṁ tataḥ kim || 7 ||

araṇye na vā svasya gehe na kārye
na dehe mano vartate me tvanarghye |
manaścenna lagnaṁ guroraṁghripadme
tataḥ kiṁ tataḥ kiṁ tataḥ kiṁ tataḥ kim || 8 ||

guroraṣṭakaṁ yaḥ paṭhetpuṇyadehī
yatirbhūpatirbrahmacārī ca gehī |
labhedvāñchitārthaṁ padaṁ brahmasaṁjñam
guroruktavākye mano yasya lagnam || 9 ||